শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসুদর্শনসূরিভিরনুগৃহীতাঃ

# ॥ শ্রীভাষ্যকারস্তুতিশ্লোকাঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীভাষ্যকারস্তুতিশ্লোকাঃ ॥

যতীন্দ্রকৃতভাষ্যার্থা যদ্ব্যাখ্যানেন দর্শিতাঃ।
ৱ্যাসং সুদর্শনার্যং তং ৱন্দে কূরকুলাধিপম্॥

তস্মৈ রামানুজার্যায নমঃ পরমযোগিনে।
যঃ শ্রুতিস্মৃতিসূত্রাণাং অন্তর্জ্ৱরমশীশমৎ॥ 1 ॥

প্রপদ্যে প্রণৱাকারং ভাষ্যং রঙ্গমিৱাপরম্।
পরস্য ব্রহ্মণো যত্র শেষিৎৱং স্ফুটমীক্ষ্যতে॥ 2 ॥

অৱিস্তৃতাস্সুগম্ভীরাঃ রামানুজমুনের্গিরঃ।
দর্শযন্তু প্রসাদেন স্ৱং ভাৱমখিলং দৃঢম্॥ 3 ॥

ভাষ্যং চেৎ ৱ্যৱৃণোৎ স্ৱযং যতিপতিঃ ৱ্যাখ্যানৱাচাং তথা
গাম্ভীর্যাদনৱস্থিতিঃ মিতমতির্দূরে জনস্তদ্গিরাম্।
প্রষ্টৱ্যঃ কথমীশ্ৱরঃ স হি ন নঃ প্রত্যক্ষরূপো দৃশাং
তদ্ভাষ্যং স চ ভাষ্যকৃৎ স চ হরিঃ সংযক্ প্রসীদন্তু নঃ॥ 4 ॥

॥ ইতি শ্রীভাষ্যকারস্তুতিশ্লোকাঃ সমাপ্তাঃ ॥